दिनाङ्क :- 26.05.2024 सायम् - 06:20

**मुख्यवार्ता:**

- लोकसभा-निर्वाचनस्य सप्तम-चरणाय प्रचाराभियानं सजवं विधीयते।
- रेमल चक्रवातस्य प्रभाव: अद्य रात्रौ बङ्गदेशस्य खेपूपुरायाम् अथ पश्चिम- बङ्गालस्य च सागरतटे दृष्टिम् आगमिष्यति।
- गुजरातस्य राजकोटे दुरापादितस्य अग्निकांडस्य अन्वीक्षणाय विशेषान्वीक्षणदलं संघटितम्। गुजरातोच्च-न्यायालये भविष्यति वादश्रवणम्।
- राजधान्यां नव-दिल्ल्यां विवेक-विहार-क्षेत्रे एकस्मिन् बाल-चिकित्सालये दुरापादितायां अग्नि दुर्घटनायां षड् नवजातशिशवः मृत्युमुपगताः। घटनायां राष्ट्रपतिः उपराष्ट्रपतिः प्रधानमन्त्री च शोकं प्रकटितवन्तः।
- आई पी एल् क्रिकेट्-स्पर्धा-मालिकायां निर्णायके द्वन्द्वे अद्य कोलकाता-नाइट्-राइडर्स्-दलं सनसाइजर्स्-हैदराबाद-दलेन सह क्रीडिष्यति।

**लोकसभानिर्वाचनम्**

लोकसभा-निर्वाचनस्य सप्तम-चरणाय प्रचाराभियानं सजवं विधीयते। भाजपादलस्य वरिष्ठो नेता प्रधानमन्त्री च नरेन्द्रमोदी अद्य उत्तरप्रदेशस्य मिर्जापुरे एकस्यां जनसभायाम् अवोचत् यत् देशस्य जनै: स्पष्टनीति-कारणेन तृतीयवारं भाजपादलसस्य नेतृत्वे राष्ट्रिय-जनतान्त्रिक-संयुतेः प्रशासन-विरचनस्य निर्णयः स्वीकृतः। प्रधानमन्त्रिणा उक्तं यत् इण्डि-संयुतेः विपक्षिणः प्रधानमन्त्रिपदम् उपहासास्पदं विधातुं प्रयतन्ते। अपि च भाजपाध्यक्षः जे.पी . नड्डा जहानाबाद-क्षेत्रे जनसभायाम् अवोचत् यत् राष्ट्रिय-जनतान्त्रिक-संयुतिः लोकसभानिर्वाचने प्रबल-बहुमतं प्राप्स्यसि। अपरत्र कांग्रेसनेता राहुलगाँन्धी हिमाचलप्रदेशस्य सिरमौर-जनपदे एकां जनसभां समबोधयन् अवोचत् यत् प्रथमोयं अवसरः यदा कांग्रेस-दलं संविधान-रक्षायै निर्वाचने प्रयत्नं विदधाति।

**दिल्यामग्निघटना**

राजधान्यां नव दिल्ल्यां विवेक-विहार-क्षेत्रे एकस्मिन् बाल-चिकित्सालये दुरापादिते अग्निकाण्डे षड् नवजात-शिशवः मृत्युमुपगताः। नैके च व्रणिताः। अस्मिन् अग्निकाण्डे द्वादश शिशवः सुरक्षिताः। अग्निकाण्डस्य कारणानि अधुना अपि न ज्ञातानि। घटनाया: सूचना गत रात्रौ सार्ध एकादशवादने अग्निशमन विभागेन दूरभाषमाध्यमेन प्राप्ता। राष्ट्रपतिः उपराष्ट्रपतिः प्रधानमन्त्री च घटनामालक्ष्य गभीर-शोकं प्रकटितवन्तः। अपरत्र गुजरातस्य राजकोटे दुरापादिते अग्निकाण्डे मृतकानां संख्या समेध्य सप्तविंशतिः संजाता। घटनाया: अन्वीक्षणाय विशेष अन्वीक्षणदलं संघटितम्। अस्मिन् विषये सोमवासरे गुजरात उच्चन्यायालये वादश्रवणं भविष्यति। अत्रान्तरे प्रधानमन्त्री नरेंद्र मोदी अद्य दिल्ली गुजरातयोः अग्निघटनयोः मृतकानां परिजनेभ्यः साहाय्यम् उदघोषयत्। प्रधानमन्त्रि-कार्यालयेन एकस्मिन् सामाजिक-सञ्चार-पटले प्रोदीरितं यत् प्रधानमन्त्रि-राष्ट्रिय-सहाय्यकोषात् द्वि-लक्ष रूप्यकाणाम् अनुग्रह राशिः प्रदास्यते। सममेव व्रणितेभ्यः पञ्चाशत् सहस्र रूप्यकाणि प्रदास्यन्ते।

## रेमल चक्रवात:

पश्चिम बंगाल-प्रशासनेन रेमल चक्रवातं सम्मुखीकर्तुं सर्वविधोपाया: विहिता: सन्ति। रेमल चक्रवात: सम्प्रति प्रबल चक्रवात रूपेण परिवर्तित:। अस्य प्रभाव: अद्य रात्रौ बङ्गदेशस्य खेपूपुरायाम् अथ पश्चिम- बङ्गालस्य च सागरतटे दृष्टिम् आगमिष्यति। अरब-भाषाया: रेमल इति शब्दस्य अर्थ: बालुका वर्तते। अयं हि प्रथम: चक्रवात: अस्ति यत् प्रावृट् कालात् पूर्वं बङ्गाल-खात्याम् आगमिष्यति। भारतीय ऋतु विज्ञानविभागेन पश्चिम-बङ्गालस्य तटवर्ति-जनपदेषु ओडिशियां उत्तरभागे अद्य श्व: च प्रबल वृष्टे: सम्भावना प्रकटिता अस्ति। सममेव असमे मेघालये च वृष्ट्या सह मणिपुरे नगालंडे अरूणाचल प्रदेशे त्रिपुरायां च प्रबल वृष्टि: अनुमानिता। अत्रान्तरे कोलकाता-विमान-पत्तन-प्राधिकरणेन अद्य मध्याह्नात् एकविंशति: होरावधये कोलकाता-विमान-पत्तने विमान-सञ्चालनं स्थगितम्।

## दूरसञ्चार-निर्देशालयः

प्रशासनेन दूरभाषमाध्येन अन्ताराष्ट्रियं छद्मव्यवहारं निवारयितुं दूरसञ्चार-सेवाप्रदातृभ्यः निर्देशाः प्रदत्ताः। सञ्चार-मन्त्रालयेन प्रोक्तं यत् छलिनः भारतीयनागरिकान् वञ्चितुम् अन्ताराष्ट्रिय-दूरभाष-सङ्ख्यानां प्रयोगं कुर्वन्ति। अनेन माध्यमेन ते अन्तर्जालीयापराधघटनाः, वित्तीयापराधान् च कुर्वन्ति। एताषां घटनानां निवारणाय दूरसंचार-विभागेन दूरभाष उपभोक्तृभ्यः एका प्रणाली विनिर्मितास्ति। दूरभाष उपभोक्तृणां दूरभाषेषु एतादृशं अन्ताराष्ट्रिय-छद्म-दूरसञ्चारं निवारयितुं दूरसञ्चार-सेवा-समवायेभ्यः निर्देशाः प्रदत्ताः।

## हजयात्रा

भारतीयहजयात्रिण: अद्य हज यात्रायै जेद्दाह-विमानपत्तनं प्राप्ता:। अयं प्रथम: अवसर: यदा इमे हजयात्रिण: बस यानस्य स्थाने रेल यानेन मक्का क्षेत्रं प्रस्थिता:। जद्दाह स्थले भारतस्य महावाणिज्य-दूतावासेन सऊदी अरबस्य सम्बद्ध अधिकारिभि: सह भारतीय हजयात्रिभ्य: अयं सौविध्यं सुलभायितम्। अनुमानम् अस्ति यत् अस्मिन् वर्षे द्वात्रिंशत् सहस्र-भारतीयहजयात्रिण: विशेष सेवाया: करिष्यन्ति।

## पायल-कपाडिया

चलचित्र निर्देशिका पायल-कपाडिया ऐतिह्यं विरच्य प्रथमा भारतीय संवृत्ता यया कॉस चलचित्र-महोत्सवे ग्रैंड पिक्स इत्याख्य: पुरस्कार: विजित:। गुरुवासरे रात्रौ प्रदार्शितेन चलचित्रेण द्वितीये क्रमे अयं पुरस्कार: प्राप्त:। अवधेयं यत् त्रिंशत् वर्षेषु अयं प्रथम: अवसर: यदा कस्यापि भारतीय महिला-चलचित्र-निर्देशिकाया: चलचित्रम् अस्मिन् महोत्सवे प्रदर्शितम्। एतत् चलचित्रं प्रभा नामन्या परिचारिकाया: जीवन-सम्बद्धं वर्तते। अस्मिन् एव चलचित्र-महोत्सवे अभिनेत्री अनसूया सेनगुप्ता उत्तम अभिनयाय पुरस्कार-विजेत्री प्रथमा भारतीया संवृत्ता। तया अयं पुरस्कारः द शेमलेस इत्यस्मिन् चलचित्रे अनसर्टेन रिगार्ड श्रेण्यां प्राप्तः।

## विश्व पैरा एथलेटिक्स चैंपियनशिप

भारतस्य सिमरन शर्मा जापानसिय कोबे नगरे अनुवर्तमानायां विश्व पैरा एथलेटिक्स चैंपियनशिप स्पर्धामालिकायां स्वर्णपदकं विजितवती। सिमरनेन ह्यः महिलानां द्विशत-मीटर-टी 12 इति स्पर्धायां 24.95 पल-समये स्वीय- सर्वश्रेष्ठ-प्रदर्शनेन स्वर्ण-पदकं विजितम्। भारतेन विश्व पैरा एथलेटिक्स

चैंपियनशिप-स्पर्धायां षड्- स्वर्ण-पदकानि समेत्य सप्तदश-पदकानि विजितानि। अङ्क-तालिकायां भारतं षष्ठे क्रमे विद्यते।

आई पी एल्

आई पी एल् क्रिकेट्-स्पर्धा-मालिकायां निर्णायिके द्वन्द्वे अद्य कोलकाता-नाइट्-राइडर्स्-दलं सनसाइजर्स्-हैदराबाद-दलेन सह क्रीडिष्यति। एषा निर्णायक-स्पर्धा चेन्नई-नगरस्थे एम ए चिन्ना-स्वामी क्रीडाङ्गणे भविष्यति। भारतीय-समयानुसारेण स्पर्धा सायं सार्ध सप्तवादनात् आरप्स्यते।

।। इति वार्ता: ।।